# संस्कृत-वार्ता:

दिनाङ्क :- 20.05.2024 सायम् - 06:20

<u>मुख्यवार्ता:</u>

- ओडिसा-विधानसभाया: द्वितीयचरणीय-मतदानं शान्तिपूर्णरीत्या प्रवर्तते।
- सामान्य-लोकसभा-निर्वाचनस्य अवशिष्ट-चरणद्वयस्य कृते प्रचाराभियानं सजवं प्रवर्तते, प्रधानमन्त्री भाजपेतिदलस्य वरिष्ठनेता च श्रीनरेन्द्रमोदी ओडिसायां नैर्वाचनिक-सभां सम्बोधयति।
- ईरानदेशस्य राष्ट्रपति: इब्राहिम-राइसी, विदेशमन्त्री होसेन-आमिर-अब्दुल्लाहियां च उदग्रयानदुर्घटनायां निहतौ, प्रधानमन्त्रिणा मोदिना च अस्मिन् शोककाले भारतं ईरानेन सह अस्तीति उक्तम्।
- भारतस्य दीप्ति जीवनजी चतुश्शतमीटरात्मक-विशिष्टक्रीडकानां धावनस्पर्धायां विश्वकीर्तिमत् विभज्य स्वर्णपदकं विजितवती, आयोजनमिदं जापानस्य कोबेनगरे प्रचलति।

**निर्वाचनप्रचारः**

लोकसभानिर्वाचनस्य शेषद्वयचरणस्य प्रचारः पूर्णगत्या प्रचलति। सर्वेषां दलानाम् वरिष्ठनेतारः विभिन्नेषु राज्येषु प्रचारं कुर्वन्ति यत्र मतदानं भवितव्यमस्ति। प्रधानमन्त्री, भाजपाया: वरिष्ठनेता च नरेन्द्रमोदी अद्य ओडिशा-पश्चिमबङ्गयोः बहुविधाः सभाः करोति। ओडिशायां श्रीमोदी अङ्गुल्-कटक्-नगरे जनसभाः सम्बोधितवान् । सः अवदत् यत्, कटक्-क्षेत्रं भारतस्य प्राचीनतमेषु विद्यमाननगरेषु अन्यतमम् अस्ति, आधुनिकशिक्षायाः केन्द्रञ्च अस्ति। मोदीवर्यः अवदत् यत्, ओडिशायाः जनाः प्राकृतिकसंसाधनैः समृद्धाः सन्तोऽपि दरिद्रतया पीडिताः सन्ति। सश्च आरोपितवान् यत् बीजूजनतादलशासने राज्यस्य खानिज्यं संस्कृतिश्च सुरक्षिता नास्ति। सः नवीनपटनायकसर्वकारस्य आलोचनां कुर्वन् उक्तवान् यत् सः चतुर्विंशतिवर्षीये शासनकाले कृषकाणां यूनाञ्च कल्याणाय किमपि विशिष्टं पदोत्थापनं न कृतवानिति। पूर्वं प्रातःकाले प्रधानमन्त्री मोदी पवित्रे पुरीनगरे आध्विकप्रचाराभियानं समायोजितवान्। ओडिशायाः मुख्यमन्त्री तथा बीजूजनतादलस्य अध्यक्षः नवीनपटनायकः अद्य सायं यावत् राज्ये बृहत् आध्विकप्रचाराभियानेन सह जनसभानां श्रृङ्खलां च प्रचालयन्नस्ति। भाजपायाः वरिष्ठनेता अमितशाहः अद्य हरियाणा-प्रदेशस्य करनाल-हिसारयोः सभाम् अकुर्वत्। उत्तरप्रदेशस्य मुख्यमन्त्री तथा भाजपायाः वरिष्ठनेता योगी आदित्यनाथश्च चण्डीगढे सभाम् सम्बोधितवान्। समाजवादी पार्टीति दलप्रमुखः अखिलेशयादवः उत्तरप्रदेशस्य डोमरियागंज- संतकबीरनगरयोः जनसभाः संबोधितवान्। सः प्रतिज्ञापितवान् यत्, यदि मतदानं क्रियते तर्हि I.N.D.I. (इंडी) संघीय-सर्वकारः यूनां कृते त्रिंशल्लक्षं वृत्तयः प्रदास्यति तथा च अग्निवीरयोजनायाः समाप्त्यर्थमपि कार्यं करिष्यतीति।

## लोकसभा-पञ्चमचरणम्

लोकसभा-निर्वाचनस्य अद्य पञ्चमचरणीयमतदानं प्रायश: शान्तिरीत्या सम्पन्नम्। अस्मिन् चरणे द्वयोः केन्द्रशासित प्रदेशयोः अपि च षड् राज्यानां एकोनपञ्चाशत् लोकसभाक्षेत्रेभ्य: मतदानम् अभवत्। पञ्चम-चरणेऽस्मिन् उत्तर-प्रदेशस्य चतुर्दश आसनेभ्यः, महाराष्ट्रस्य त्रयोदश आसनेभ्यः, पश्चिम-बङ्गालस्य सप्त आसनेभ्यः, बिहार- ओडिशा-राज्ययोः प्रत्येकं पञ्च आसनेभ्यः, झारखण्डस्य आसनत्रयाय, जम्मू-कश्मीर-लद्दाखयोः च प्रत्येकं एकैकाय लोकसभासनाय मतदानं जातम्। ओडिशाराज्येऽपि अद्य द्वितीये चरणे पञ्चत्रिंशत्-विधानसभा-क्षेत्रेभ्य: मतदानं अभवत्। अस्मिन् चरणे पञ्चनवत्यधिक षड्शतं प्रत्याशिन: निर्वाचन समारंगणे सन्ति। चरणेऽस्मिन् प्रमुखप्रत्याशिषु केन्द्रीयमन्त्रिणः भारतीयजनतापार्टीति दलस्य वरिष्ठनेतारश्च सन्ति। येषु राजनाथसिंहः, स्मृति ईरानी, पीयूषगोयलः, काङ्ग्रेसस्य राहुलगान्धी, नेशनल कांफ्रेंस इत्यस्य उमर अब्दुल्ला लोक जनशक्ति पार्टीति दलस्य (रामविलास-वर्गस्य) चिराग-पासवानोऽपि वर्तते। द्वात्रिंशत उत्तर सप्तशताधिक चतुर्णवति-सहस्रेषु मतदानकेन्द्रेषु सप्तचत्वारिंशदुत्तर नवलक्षाधिका: अधिकारिण: नियोजिता सन्ति। मतदानकेन्द्रेषु पेयजल-प्रसाधन-सुवाह्यासन्द-छाया-इत्यादय: प्रबन्धा: कृता: सन्ति। येन हि मतदातार: सुलभतया मतदानं कर्तुं शक्नुवन्ति। आहत्य अद्यतनीये मतदाने पंचवादनं यावत् सप्तपञ्चाशदुत्तर प्रतिशतम् अभवत्।

पश्चिम-बंगाले - त्रिसप्तति

लद्दाखे सप्तषष्ट्यधिकम्

झारखंडे द्विषष्टिप्राय:

ओडिसायाम् एकषष्टि प्रतिशतं

उत्तरप्रदेशे षड्पञ्चाशत्,

जम्मू-कश्मीरे चतु:पञ्चाशत्

बिहारे द्विपञ्चाशदधिकम्

महाराष्ट्रे च एकोनपञ्चाशत् प्रतिशतं मतदान जातम्।

## ईरान-उदग्रविमानघटना

ईरानदेशस्य राष्ट्रपतिं इब्राहिम-रईसी-इत्यमुं अपि च वरिष्ठाधिकारिण: च नीयमानं उदग्रविमानं ह्य: दुर्घटनाग्रस्तं अभवत्। ईरानदेशस्य सर्वकारीय-वार्ताभिकरणेन इरना इत्यनेन अस्या: वार्ताया: पुष्टीकृता। अस्यां दुर्घटनायां ईरानस्य राष्ट्रपतिना सह विदेशमन्त्री अपि मृत्युमुपगतौ। अवधेयं वर्तते यत् राष्ट्रपति: रईसी. इत्येष: अजरबैजानइत्यस्य सीमसमीपं एकस्य जलबन्धस्य उद्घाटन- समारोहात् प्रत्यागच्छन् आसीत्। प्रधानमन्त्री नरेन्द्रमोदी इत्यनेन उक्तं यत् ईरानस्य राष्ट्रपतिसनः डॉ. सैयद इब्राहिम रायसी इत्यस्य दुःखास्पदं निधनविषयं ज्ञात्वा सः अतीव दुःखितः, आहतश्च अभवदिति। सामाजिक-प्रसार-तंत्र-जाले प्रदत्तसंदेशे श्रीमोदी अवदत् यत् भारत-ईरान-द्विपक्षीयसम्बन्धं सुदृढं कर्तुं तस्य योगदानं सर्वदा स्मर्यते। प्रधानमन्त्री उक्तवान्, भारतम् अस्मिन् शोककाले ईरानेन सह अस्तीति।

## **सर्वोच्च न्यायालयः**

सर्वोच्चन्यायालयेन अद्य भारतीय-दंड-संहिता, आपराधिक-दंड-संहिता, इत्येतयो: साक्ष्यविधेः स्थाने सद्यः एव निर्मितानाम् आपराधिकविधीन् विरुध्य आवेदिता जनहितयाचिका (पीआईएल इति) विचाराय अस्वीकृता। आरम्भे न्यायाधीशः बेला-एम.त्रिवेदी इत्यस्या: अध्यक्षतायां अवकाशपीठः याचिकाकर्तां व्यक्तिगतरूपेण अकथयत् यत् याचिकेयं निरस्तीकरणयोग्या अस्तीति। न्यायमूर्तेः पंकजमिथलस्य पीठेन अपि उक्तं यत् जनहितयाचिकेयम् अतीव आकस्मिकतया आपत्तिपूर्णा च अभ्यर्थितास्ति। जनहित याचिकायां उक्तमासीत् यत् भारतीयन्यायसंहितायां, भारतीयसाक्ष्याधिनियमे, भारतीयनगरिकसुरक्षासंहितायां च अनेके दोषाः, विसंगतयश्च सन्तीति।

**आईसीएमआर- कोवैक्सिन्**

बनारस-हिंदू-विश्वविद्यालयस्य शोधपत्रिकायां प्रकाशितलेखविषये भारतीय-आयुर्विज्ञान-अनुसंधान-परिषदा (ICMR) इत्यनेन उक्तं यत् कोवैक्सिन् इत्यस्य दुष्प्रभावविषये अध्ययन-सम्बन्धितः लेखः भ्रामकः अस्ति, अतः विषयेऽस्मिन् ICMR इत्यस्य भिन्ना मान्यता अस्तीति। एकस्मिन् वक्तव्ये आईसीएमआर इत्यनेन उक्तं यत्, आई सी एम आर अनेन अध्ययनेन सह सम्बद्धः नास्ति, शोधार्थं च कथमपि तथ्यात्मकं आर्थिकं वा समर्थनमपि न दत्तवान् इति। आईसीएमआर इत्यस्य महानिदेशकेन डॉ राजीव बहल् इत्यनेन पत्रस्य लेखकासम्पादकौ पत्रं विलिख्य निर्दिष्टौ यत् आईसीएमआर इत्यस्य प्रामाणिकतामभिधायिकां मान्यतां तत्क्षणं लेखात् अपसारयन्त्विति। श्रीबहलेन अध्ययनस्य त्रुटिपूर्णकार्यप्रणाल्या सह प्रारूपस्योपरि अपि प्रश्नोत्थापितः।

**दीप्तिः स्वर्णपदकम्**

विंशतिः वर्षीया दीप्ति जीवनजी इति महिलानां चतुश्शत मीटर्-परिमितस्य प्रतिस्पर्धायां विश्वकीर्तिमत् भग्नीकृत्य, अद्य जापानदेशस्य कोबेनगरे विश्वपैरा एथलेटिक्स-प्रतियोगितायां प्रथमं स्वर्णपदकं समर्जितवती ।

।। इति वार्ताः ।।